# ॥ श्री महात्रिपुरसुन्दरी सुप्रभातम् ॥

ॐ उत्तिष्ठोत्तिष्ठ देवेशि उत्तिष्ठ शिवसुन्दरि ।
उत्तिष्ठ श्रीमहाराज्ञि त्रैलोक्यं मङ्गलं कुरु ॥

नीराजनेन जगदीश्वरि भक्तसङ्घैः
नीराज्यसे भुवनमङ्गल सिद्धिहेतोः ।
भक्त्या प्रभातसमये सह वाद्यघोषैः
संस्तूयसे जहिहि कैतव योगनिद्राम् ॥

निद्रा न ते त्रिजगदीश्वरि विष्णुमाये
सृष्टिस्थितिप्रलयकेलिषु संस्थितायाः ।
मन्मोहपाश निगडस्य विमोक्षणाय
संप्रार्थ्यसे जननि मङ्गलसूक्तिभिस्त्वम् ॥

कल्याणशैलनिलये करुणार्णवे श्री
कामेश्वराङ्कनिहिते कलिदोषहन्त्रि ।
कालाम्बुधाभकचबन्धबरे मनोज्ञे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

एणाङ्कखण्डयुतरत्नलसत्किरीटे
शोणाचलेश सहधर्मिणि बाणहस्ते ।
वीणाधरेण मुनिना परिगीयमाने
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

ईशानमुख्यसुरमौळिलसत्पदाब्जे
श्रीमत्सदाशिव महाफलकाढ्यमञ्चे ।
ईशत्स्मितेन विकसत्सुमनोहरास्ये
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

लज्जानतेन नयनेन विलोकमाने
त्रैलोक्यसुन्दरतनुं परशम्भुनाथम् ।
मन्दस्मितोल्लसित चारु मुखारविन्दे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

ह्रीङ्कारजापसुहिते हृदयाम्बुजस्थे
हार्दान्धकारविनिहन्त्रि हरित्पतीढ्ये ।
हर्यक्षवाहिनि हलायुधसेविताङ्घ्रे

श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

हस्तेन देवि फणिपाशमथेक्षुचापम्
पुष्पास्त्रमङ्कुशवरं सततं दधाने ।
हेमाद्रितुङ्गतरशृङ्ग कृताधिवासे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

सर्वागमोपनिषदीढ्य महाप्रभावे
सामाभिगानविनुते सरसीरुहाक्षि ।
सच्चित्सुखैकरसिके सकलेष्टदात्रि
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

कल्याणदात्रि कमनीयगुणार्णवे श्री
कल्माषपादपरिपूजित पादपद्मे ।
कैवल्यदे कलिमलापह चित्स्वरूपे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

हत्वाऽसुरेन्द्रमतिबाहुबलावलिप्तम्
भण्डं प्रचण्डसमरोद्यतमात्तशस्त्रम् ।

संरक्षित त्रिजगति त्रिपुराधिवासे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

लब्धुं तव त्रिपुरसुन्दरि सत्कटाक्षम्
कारुण्यपूर्णममरेशमुखा दिगीशाः ।
कक्ष्यान्तमेत्य निवसन्ति तव प्रबोधे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

ह्रीमित्यजस्रमपि ते मनुमादरेण
हृत्पङ्कजेऽनुकलयन् प्रजपामि नित्यम् ।
हर्षप्रदे हृदयसन्तमसापहन्त्रि
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

सत्यात्मिके सकललोकहितप्रदेऽम्ब
सम्पत्करी किटमुखी परिसेविताङ्घ्रे ।
सर्वानवद्यचरिते सुकुमारगात्रि
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

कामो हि तेऽम्ब करुणालवमेव लब्ध्वा

पुष्पायुधोऽपि भवति त्रिजगद्विजेता ।
कामेश्वरेण परिकाङ्क्षित सत्कटाक्षे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

लज्जापदाङ्कित मनुप्रतिपाद्यरूपे
लीलाविलोकन विसृष्टजगत्सहस्रे ।
लावण्यपूर्णवदने ललिताभिधाने
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

ह्रीङ्कारमन्त्रनिलये हृदिभावनीये
ह्रीङ्कारगर्भमनुजापक सिद्धिदात्रि ।
ह्रीङ्कारमन्त्रमहनीय निजस्वरूपे
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

श्रीशङ्करार्चितपदे शिवभागधेये
श्रीकामराजमहिषि श्रितकामधेनो ।
श्रीशङ्करस्य कुलमङ्गलदेवतेऽम्ब
श्रीमन्महात्रिपुरसुन्दरि सुप्रभातम् ॥

श्रीसुप्रभातमहित स्तवमम्बिकायाः
भक्त्या प्रभातसमये भुवि ये पठन्ति ।
श्रीमात्रनुग्रहनिरस्तसमस्त खेदाः
सच्चित्सुखात्मक पदं प्रविशन्ति सत्यम् ॥

मुनीन्द्रनारदागस्त्यमान्यायै जय मङ्गलम् ।
प्रणतार्तिनिवारिण्यै पूर्णायै शुभमङ्गलम् ॥
विविधोपनिषद्वेतृवेद्यायै जय मङ्गलम् ।
शुद्धबुद्धसदानन्दब्रह्मणे शुभ मङ्गलम् ॥
नतलोकेष्टदायिन्यै नित्यायै नित्य मङ्गलम् ।
सर्वमङ्गलयुक्तायै सत्यायै सर्व मङ्गलम् ॥
सर्वब्रह्माण्डसन्दोहजनन्यै जय मङ्गलम् ।
शङ्करार्चितपादायै शिवाण्यै शुभमङ्गलम् ॥
श्रीचक्रराजनिलयायै श्रीमात्रे जय मङ्गलम् ।
महात्रिपुरसुन्दर्यै शिवायै शुभमङ्गलम् ॥

॥ इति श्री शङ्करानन्दनाथ विरचितं श्री महात्रिपुरसुन्दरी सुप्रभातम् समाप्तम् ॥

ॐ ॥